
पाठ–18

# सत्यप्रियता



विधानचन्द्ररायः श्रेष्ठः राजनीतिज्ञः चिकित्सकश्च आसीत्। भारतरत्नबिरुदभाक् सः पश्चिमबङ्गालस्य मुख्यमंत्री आसीत। अत्यन्तं बुद्धिमान् सः छात्रदशायां प्रत्येकं परीक्षायाम् अपि प्रथमस्थानं प्राप्नोति स्म। परं च एकदा सः महाविद्यालये परीक्षायाम् अनुत्तीर्णः जातः। सः प्रसङ्गः एवम् अस्ति–

एकदा विधानचन्द्रः महाविद्यालयस्य मुख्यद्वारस्य पुरतः स्थितवान् आसीत्। तस्मिन् समये एव महाविद्यालयस्य प्राचार्यः स्वीयं यानं चालयन् महाविद्यालयम् आगच्छन् आसीत्। प्राचार्यः अजागरूकतया वाहनं चालितवान्, येन मार्गे गच्छतः एकस्य पथिकस्य घट्टनं कृतं तस्य यानेन। सः पथिकः आहतः भूत्वा भूमौ पतितः। दैवकृपया तस्य प्राणाः रक्षिताः।

तदा एव तत्र आगतः आरक्षकः प्राचार्यस्य विरुद्धं प्रकरणं पञ्जीकृतवान्। विधानचन्द्रः प्राचार्यस्य एव विद्यार्थी। अस्याः घटनायाः प्रत्यक्षदर्शी सः एकः एव आसीत्। 'मदीय छात्रः मम विरुद्धं न्यायालये साक्ष्यं न वदिष्यति' इति प्राचार्यस्य दृढः विश्वासः आसीत्। परं विधानचन्द्रः न्यायालये सत्यमेव अवर्णयत्। तेन न्यायाधीशः प्राचार्यं दण्डितवान्। प्राचार्यः क्रुद्धः जातः। तस्य मनसि विधानचन्द्रस्य विषये दुर्भावना उत्पन्ना।

तस्मिन् वर्षेऽपि वार्षिकपरीक्षायां विधानचन्द्रेण उत्तराणि सम्यक् एव लिखितानि। परं सः न्यूनान् अङ्कान् प्राप्तवान्। परीक्षायाम् अनुत्तीर्णश्च जातः। विधानचन्द्रः एतस्य कारणं ज्ञातवान्। तथापि सः तस्मिन् विषये किमपि न उक्तवान्। अनन्तरवर्षे पुनरपि परीक्षां लिखित्वा उत्तमैः अङ्कैः उत्तीर्णः जातः।

प्राचार्यः विधानचन्द्रम् आहूय प्रोक्तवान्- "विगते वर्षे भवान् परीक्षायाम् असफलः जातः। एतस्य कारणं जानाति किम्? इति।

"आम्, जानामि। विगते वर्षे न्यायालये मया सत्यवचनम् उक्तम् इति भवान् क्रुद्धः जातः। मह्यं न्यूनान् अङ्कान् दत्तवान्। अतः अहम् अनुत्तीर्णः जातः। भवतु नाम। सत्यप्रियतायाः रक्षणे एकस्य वर्षस्य हानिः न महती" इति।

एतत् श्रुत्वा सः प्राचार्यः नितरां विस्मितः जातः। स्वस्य छात्रस्य पुरतः स्वयमेव लज्जितश्च अभवत्।

## अभ्यासः

1. विधानचन्द्ररायः कः आसीत्?
2. अयं कीदृशः छात्रः आसीत्?
3. विधानचन्द्ररायस्य प्राचार्यः कथं लज्जितः अभवत्?

★★★